चक्षुषोपनिष

नं. १३४४

सं. २३४६ क

[illegible]

१ [illegible]

[illegible]

# 5804

F 1

Complete

Sharma

१ ॐ श्रीगणेशाय नमः ॐ नमः सूर्याय अथात
श्चाक्षुषीविद्यां पठितसिद्धां चक्षूरोगहरां व्याख्या
स्यामः यया चक्षूरोगाः सर्वतो नश्यंति चक्षुषो
दीप्तिर्भवति तस्याश्चाक्षुषविद्याया अहिर्बुध्न्य
ऋषिः गायत्री छंदः श्रीसूर्यो देवता चक्षूरोगनिवृ
त्तये जपे विनियोगः ॐ चक्षुश्चक्षुश्चक्षुस्तेजः
स्थिरीभव मां पाहि मां पाहि त्वरितं चक्षूरोगान्
शमय शमय मम जातरूपं तेजो दर्शय दर्शय
यथाहमंधो न स्यामिति तथा कल्पय कल्पय कल्या
णं कुरु कुरु यानि यानि पूर्वजन्मोपार्जितानि चक्षुः
प्रतिरोधकदुःकृतानि सर्वाणि निर्मूलय निर्मू
लय ॐ नमः चक्षुस्तेजोदात्रे दिव्याय भास्कराय ॐ
नमः करुणाकरायामृताय ॐ नमो भगवते श्री
सूर्यायाक्षितेजसे नमः खेचराय नमः महते नमः
तमसे नमः रजसे नमः असतो मा सद्गमय तम
सो मां ज्योतिर्गमय मृत्योर्मामृतं गमय उष्णो
भगवान् शुचिरूपः य इमां चाक्षुष्मती विद्यां ब्रा
ह्मणो नित्यमधीते न तस्याक्षिरोगो भवति न त
स्य कुलेंधो भवति अष्टौ ब्राह्मणान् सम्यग्ग्राहयि
त्वा विद्यासिद्धिर्भवति ॐ विश्वरूपं घृणिनं जात
वेदसं हिरण्मयं पुरुषं ज्योतिरूपं तपंतं सहस्र
रश्मिः शतधा वर्तमानः पुरः प्रजानामुदयत्येष सू
र्यः ॐ नमो भगवते आदित्याय अहोवाहिनी वाहि
नी स्वाहा । इति चाक्षुषोपनिषत् ॥



